# पन्नगेन्द्र शयन

## रागमलिका ताळम्: रूपकम्

(*श्री स्वाति तिरुनाळ् विरचित*)

पल्लवि

रागं शङ्कराभरणं

पन्नगेन्द्रशयन श्रीपद्मनाभ मुदा काम-
सन्नमानसं मामव सारसायतलोचन

चरणानि

रागं काम्भोजि

मन्दमारुतोपि मम मानसं विवशयति
कुन्दकुड्मळरदन कोपमाशु जहि मयि

रागं नीलाम्बरि

कोकिलशुकादि मञ्जुकूजितमपि मे हन्त
पाकशासनविनुत भाति घोरतममये

रागं भैरवि

मानिनीजनहसितां मा कुरि मामनन्येशां
सूनसायकसदृशशोभनाङ्ग दयापर

रागं तोडि

यामिनीसंवेशेशु त्वाम् काममवलोकयामि
कोमळाङ्ग विगळितघोरतापा क्षणं तदानीं

रागं सुरटि

पाटलबिम्बसदृशपावनविमलाधर
हाटकोपमवसन हारशोभितकन्धर

रागं नाथनामक्रिय

देव देव कृपया मे देहि बाहुनिपीडनं
भावयामि भवदीयापाङ्गलीलां रमावर

रागं भूपाळं

मोदयामि जगदीश मोहन कामकेळिषु
सादरमर्थये नाथ सामजवरगमन

◇ ◇ ◇ ◇ ◇ ◇ ◇ ◇ ◇ ◇